# Goda Stutih

# ગોદાસ્તુતિઃ

## Document Information

Text title : Goda Stutih

File name : godAstutiH.itx

Category : devii, nadI, vedAnta-deshika, devI

Location : doc_devii

Author : vedAntadeshika

Proofread by : PSA Easwaran

Description/comments : Vishnu Sthuthi Manjari 3

Latest update : December 30, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 30, 2021

*sanskritdocuments.org*

# Goda Stutih

# ગોદાસ્તુતિઃ

(શ્રીવેદાન્તદેશિકવિરચિતા)

શ્રીવિષ્ણુચિત્તકુલનન્દનકલ્પવલ્લીં
    શ્રીરઙ્ગરાજહરિચન્દનયોગદૃશ્યામ્ ।
સાક્ષાત્ક્ષમાં કરુણયા કમલામિવાન્યાં
    ગોદામનન્યશરણઃ શરણં પ્રપદ્યે ॥ ૧॥

વૈદેશિકઃ શ્રુતિગિરામપિ ભૂયસીનાં
    વર્ણેષુ માતિ મહિમા ન હિ માદૃશાં તે ।
ઇત્થં વિદન્તમપિ માં સહસૈવ ગોદે
    મૌનદ્રુહો મુખરયન્તિ ગુણાસ્ત્વદીયાઃ ॥ ૨॥

ત્વત્પ્રેયસઃ શ્રવણયોરમૃતાયમાનાં
    તુલ્યાં ત્વદીયમણિનૂપુરશિઞ્જિતાનામ્ ।
ગોદે ત્વમેવ જનનિ ત્વદભિષ્ટવાર્હાં
    વાચં પ્રસન્નમધુરાં મમ સંવિધેહિ ॥ ૩॥

કૃષ્ણાન્વયેન દધતીં યમુનાનુભાવં
    તીર્થૈર્યથાવદવગાહ્ય સરસ્વતીં તે ।
ગોદે વિકસ્વર ધિયાં ભવતી કટાક્ષાત્
    વાચઃ સ્ફુરન્તિ મકરન્દમુચઃ કવીનામ્ ॥ ૪॥

અસ્માદૃશામપકૃતૌ ચિરદીક્ષિતાનામ્
    અહ્નાય દેવિ દયતે યદસૌ મુકુન્દઃ ।
તન્નિશ્ચિતં નિયમિતસ્તવ મૌલિદામ્ના
    તન્ત્રીનિનાદમધુરૈશ્ચ ગિરાં નિગુમ્ભૈઃ ॥ ૫॥

શોણાધરેઽપિ કુચયોરપિ તુઙ્ગભદ્રા
    વાચાં પ્રવાહનિવહેઽપિ સરસ્વતી ત્વમ્ ।
અપ્રાકૃતૈરપિ રસૈર્વિરજા સ્વભાવાત્

ગોદાઽપિ દેવિ કમિતુર્નનુ નર્મદાઽસિ ॥ ૬॥

વલ્મીકતઃ શ્રવણતો વસુધાત્મનસ્તે
જાતો બભૂવ સ મુનિઃ કવિસાર્વભૌમઃ ।
ગોદે કિમદ્ભુતમિદં યદમી સ્વદન્તે
વક્ત્રારવિન્દમકરન્દનિભાઃ પ્રબન્ધાઃ ॥ ૭॥

ભોક્તું તવ પ્રિયતમં ભવતીવ ગોદે
ભક્તિં નિજાં પ્રણયભાવનયા ગૃણન્તઃ ।
ઉચ્ચાવચૈર્વિરહસઙ્ગમજૈરુદન્તૈઃ
શ‍ૃઙ્ગારયન્તિ હૃદયં ગુરવસ્ત્વદીયાઃ ॥ ૮॥

માતઃ સમુત્થિતવતીમધિવિષ્ણુચિત્તં
વિશ્વોપજીવ્યમમૃતં વચસા દુહાનામ્ ।
તાપચ્છિદં હિમરુચેરિવ મૂર્તિમન્યાં
સન્તઃ પયોધિદુહિતુઃ સહજાં વિદુસ્ત્વામ્ ॥ ૯॥

તાતસ્તુ તે મધુભિદઃ સ્તુતિલેશવશ્યાત્
કર્ણામૃતૈઃ સ્તુતિશતૈરનવાપ્તપૂર્વમ્ ।
ત્વન્મૌલિગન્ધસુભગામુપહૃત્ય માલાં
લેભે મહત્તરપદાનુગુણં પ્રસાદમ્ ॥ ૧૦॥

દિગ્દક્ષિણાઽપિ પરિપક્ત્રિમપુણ્યલભ્યાત્
સર્વોત્તરા ભવતિ દેવિ તવાવતારાત્ ।
યત્રૈવ રઙ્ગપતિના બહુમાનપૂર્વં
નિદ્રાલુનાપિ નિયતં નિહિતાઃ કટાક્ષાઃ ॥ ૧૧॥

પ્રાયેણ દેવિ ભવતીવ્યપદેશયોગાત્
ગોદાવરી જગદિદં પયસા પુનીતે ।
યસ્યાં સમેત્ય સમયેષુ ચિરં નિવાસાત્
ભાગીરથીપ્રભૃતયોઽપિ ભવન્તિ પુણ્યાઃ ॥ ૧૨॥

નાગેશયઃ સુતનુ પક્ષિરથઃ કથં તે
જાતઃ સ્વયંવરપતિઃ પુરુષઃ પુરાણઃ ।
એવં વિધાઃ સમુચિતં પ્રણયં ભવત્યાઃ
સન્દર્શયન્તિ પરિહાસગિરઃ સખીનામ્ ॥ ૧૩॥

ત્વદ્ભુક્તમાલ્યસુરભીકૃતચારુમૌલેઃ
    હિત્વા ભુજાન્તરગતામપિ વૈજયન્તીમ્ ।
પત્યુસ્તવેશ્વરિ મિથઃ પ્રતિઘાતલોલાઃ
    બર્હાતપત્રરુચિમારચયન્તિ ભૃઙ્ગાઃ ॥ ૧૪॥

આમોદવત્યપિ સદા હૃદયઙ્ગમાઽપિ
    રાગાન્વિતાઽપિ લલિતાઽપિ ગુણોત્તરાઽપિ ।
મૌલિસ્રજા તવ મુકુન્દકિરીટભાજા
    ગોદે ભવત્યધરિતા ખલુ વૈજયન્તી ॥ ૧૫॥

ત્વન્મૌલિદામનિ વિભોઃ શિરસા ગૃહીતે
    સ્વચ્છન્દકલ્પિતસપીતિરસપ્રમોદાઃ ।
મઞ્જુસ્વના મધુલિહો વિદધુઃ સ્વયં તે
    સ્વાયંવરં કમપિ મઙ્ગલતૂર્યઘોષમ્ ॥ ૧૬॥

વિશ્વાયમાનરજસા કમલેન નાભૌ (વિશ્વાસમાનરજસા)
    વક્ષઃસ્થલે ચ કમલાસ્તનચન્દનેન ।
આમોદિતોઽપિ નિગમૈર્વિભુરઙ્ઘ્રિયુગ્મે
    ધત્તે નતેન શિરસા તવ મૌલિમાલામ્ ॥ ૧૭॥

ચૂડાપદેન પરિગૃહ્ય તવોત્તરીયં
    માલામપિ ત્વદલકૈરધિવાસ્ય દત્તામ્ ।
પ્રાયેણ રઙ્ગપતિરેષ બિભર્તિ ગોદે
    સૌભાગ્યસમ્પદભિષેકમહાધિકારમ્ ॥ ૧૮॥

તુઙ્ગૈરકૃત્રિમગિરઃ સ્વયમુત્તમાઙ્ગૈઃ
    યં સર્વગન્ધ ઇતિ સાદરમુદ્વહન્તિ ।
આમોદમન્યમધિગચ્છતિ માલિકાભિઃ
    સોઽપિ ત્વદીયકુટિલાલકવાસિતાભિઃ ॥ ૧૯॥

ધન્યે સમસ્તજગતાં પિતુરુત્તમાઙ્ગે
    ત્વન્મૌલિમાલ્યભરસમ્ભરણેન ભૂયઃ ।
ઇન્દીવરસ્રજમિવાદધતિ ત્વદીયા-
    ન્યાકેકરાણિ બહુમાનવિલોકિતાનિ ॥ ૨૦॥

રઙ્ગેશ્વરસ્ય તવ ચ પ્રણયાનુબન્ધાત્
    અન્યોન્યમાલ્યપરિવૃત્તિમભિષ્ટુવન્તઃ ।

વાચાલયન્તિ વસુધે રસિકાસ્ત્રિલોકીં
    ન્યૂનાધિકત્વસમતાવિષયૈર્વિવાદૈઃ ॥ ૨૧॥

દૂર્વાદલપ્રતિમયા તવ દેહકાન્ત્યા
    ગોરોચનારુચિરયા ચ રુચેન્દિરાયાઃ ।
આસીદનુજ્ઝિતશિખાવલકણ્ઠશોભં
    માઙ્ગલ્યદં પ્રણમતાં મધુવૈરિગાત્રમ્ ॥ ૨૨॥

અર્ચ્યં સમર્ચ્ય નિયમૈર્નિગમપ્રસૂનૈઃ
    નાથં ત્વયા કમલયા ચ સમેયિવાંસમ્ ।
માતશ્ચિરં નિરવિશન્નિજમાધિરાજ્યં
    માન્યા મનુપ્રભૃતયોઽપિ મહીક્ષિતસ્તે ॥ ૨૩॥

આર્દ્રાપરાધિનિ જનેઽપ્યભિરક્ષણાર્થં
    રઙ્ગેશ્વરસ્ય રમયા વિનિવેદ્યમાને ।
પાર્શ્વે પરત્ર ભવતી યદિ તત્ર નાસીત્
    પ્રાયેણ દેવિ વદનં પરિવર્તિતં સ્યાત્ ॥ ૨૪॥

ગોદે ગુણૈરપનયન્ પ્રણતાપરાધાન્
    ભ્રૂક્ષેપ એવ તવ ભોગરસાનુકૂલઃ ।
કર્માનુબન્ધિ ફલદાનરતસ્ય ભર્તુઃ
    સ્વાતન્ત્ર્યદુર્વ્યસનમર્મભિદા નિદાનમ્ ॥ ૨૫॥

રઙ્ગે તટિદ્ગુણવતો રમયૈવ ગોદે
    કૃષ્ણામ્બુદસ્ય ઘટિતાં કૃપયા સુવૃષ્ટ્યા ।
દૌર્ગત્યદુર્વિષવિનાશસુધાનદીં ત્વાં
    સન્તઃ પ્રપદ્ય શમયન્ત્યચિરેણ તાપાન્ ॥ ૨૬॥

જાતાપરાધમપિ મામનુકમ્પ્ય ગોદે
    ગોપ્ત્રી યદિ ત્વમસિ યુક્તમિદં ભવત્યાઃ ।
વાત્સલ્યનિર્ભરતયા જનની કુમારં
    સ્તન્યેન વર્ધયતિ દષ્ટપયોધરાઽપિ ॥ ૨૭॥

શતમખમણિનીલા ચારુ કલ્હારહસ્તા
    સ્તનભરનમિતાઙ્ગી સાન્દ્રવાત્સલ્યસિન્ધુઃ ।
અલકવિનિહિતાભિઃ સ્રગ્ભરાકૃષ્ટનાથા
    વિલસતુ હૃદિ ગોદા વિષ્ણુચિત્તાત્મજા નઃ ॥ ૨૮॥

ઇતિ વિકસિતભક્તેરુત્થિતાં વેઙ્કટેશાત્
  બહુગુણરમણીયાં વક્તિ ગોદાસ્તુતિં યઃ ।
સ ભવતિ બહુમાન્યઃ શ્રીમતો રઙ્ગભર્તુઃ
  ચરણકમલસેવાં શાશ્વતીમભ્યુપૈષ્યન્ ॥ ૨૯॥

ઇતિ શ્રીવેદાન્તદેશિકવિરચિતા ગોદાસ્તુતિઃ સમાપ્તા ।

Proofread by PSA Easwaran

---

*Goda Stutih*

pdf was typeset on December 30, 2021

Please send corrections to *sanskrit@cheerful.com*